मन्त्रान्तरं यथा,—
वज्रवैरोचनीये च कूर्च्चयुग्मं सफट्ठट: ।
तारादेरेषा महाविद्या सर्व्वतेजोऽपहारिणी ॥
त्रैलोक्याकर्षिणी विद्या चतुर्व्वर्गफलप्रदा ।
ध्यानपूजादिकं सर्व्वं षोड़शीवत् समाचरेत् ॥*॥
इदानीं षोड़शीविद्याप्रशंसामाह ।
तथा सर्व्वप्रयत्नेन सर्व्वोपास्या च षोड़शी ।
लक्ष्मीबीजादिका सैव सर्व्वैश्वर्य्यप्रदायिनी ॥
लज्जाद्या स्वर्गभूनागयोषिदाकर्षिणी परा ।
कूर्च्चाद्या सर्व्वजन्तूनां महापातकनाशिनी ॥
वाग्भवाद्या यदा देवी वागीशत्वप्रदायिनी ।
एषा तु षोड़शीविद्या वेद्या सप्तदशाक्षरी ॥
श्रीबीजपुटिता सा तु लक्ष्मीवृद्धिकरी सदा ।
लज्जया पुटिता विद्या त्रैलोक्याकर्षिणी परा ॥
कूर्च्चेन पुटिता सर्व्वपापिनां पापहारिणी ।
वाग्बीजपुटिता चैषा वागीशत्वप्रदायिनी ॥
चतुर्व्विधेति विद्यैषा प्रिये ! सप्तदशाक्षरी ।
ताराद्या षोड़शी चान्या भवेत् सप्तदशाक्षरी ।
एषा विद्या महाविद्या भुक्तिमुक्तिकरी सदा ।
कमला भुवनेशानी कूर्च्चबीजं सरस्वती ॥
वज्रवैरोचनीये च पूर्व्वबीजानि चोच्चरेत् ।
फट् स्वाहा च महाविद्या वसुचन्द्राक्षरी परा ।
तारादेकोनविंशार्णा ब्रह्मविद्यास्वरूपिणी ।
एते विद्योत्तमे देवि ! भुक्तिमुक्तिप्रदे शुभे ॥ * ॥
लक्ष्म्यादिपुटिता पूर्व्वा रन्ध्रचन्द्राक्षरी भवेत् ।
चतुर्द्धा च महाविद्या चतुर्व्वर्गफलप्रदा ॥
प्रणवाद्या यदा चैषा भोगमोक्षकरी सदा ।*।
विद्यान्तरं प्रवक्ष्यामि सावधानावधारय ।
हृल्लेखाकूर्च्चवाग्बीजवज्रवैरोचनीये हूं ॥
अस्त्रं स्वाहा महाविद्या चतुर्द्दशाक्षरी मता ।
सर्व्वैश्वर्य्यप्रदा चैषा सर्व्वसंमोहकारिणी ॥*॥
भुवनेशी त्रितत्त्वञ्च वाग्बीजं प्रणवं तत: ।
वज्रवैरोचनीये च फट् स्वाहा च तथापरा ॥
चतुर्द्दशाक्षरी चैषा चतुर्व्वर्गफलप्रदा ।
एषा विद्या महाविद्या जन्ममृत्युविनाशिनी ॥*॥
तन्त्रान्तरे ।
रमा कामस्तथा लज्जा वाग्भवं वज्र वै पदम् ।
रोचनीये लज्जाद्वन्द्वमन्तं स्वाहासमन्वितम् ॥
इयं सा षोड़शी प्रोक्ता सर्व्वकामफलप्रदा ।
कथिता: सकला विद्या: सारात्सारतरा: शुभा: ॥
आसां ऋषिर्भैरवोऽहं नाम्ना तु क्रोधभूपति: ।
सम्राट् छन्दो देवता च छिन्नमस्ता प्रकीर्त्तिता ।
षड्दीर्घभाक्स्वरेणैव प्रणवाद्येन सुन्दरि ! ।
खड्गाद्येन ठठान्तानि षड़ङ्गानि प्रकल्पयेत् ॥
नारदेशादिकश्चासां ता: सुसिद्धा: सुरासुरै: ।
सकलेषु च वर्णेषु सकलेष्वाश्रमेषु च ॥
धार्म्मिकेषु च धर्म्मेषु भुक्तिमुक्तिप्रदायिका ।
प्रणवाद्याश्च या विद्या शूद्रादौ न समीरिता: ॥
अथवाप्येव विशेषोऽयं योषिच्चेत् बहुधाचरेत् ।
डाकिनी सा भवत्येव डाकिनीभि: प्रजायते ॥
पतिहीना पुत्त्रहीना यथा स्यात् सिद्धयोगिनी ।
इति ते कथितं सर्व्वं रहस्यमखिलं प्रिये ! ॥
अतिस्नेहतरङ्गेन भक्त्या दासोऽस्मि ते प्रिये ! ।
एतासां ध्यानपूजादिकं षोड़शीवत् कार्य्यम् ॥*॥
नाभौ शुभ्रारविन्दं तदुपरि कमलं मण्डलं चण्ड-
रश्मे:
संसारस्यैकसारां त्रिभुवनजननीं धर्म्म-
कामोदयाढ्याम् ।
तस्मिन् मध्ये त्रिकोणे त्रितयतनुधरां छिन्नमस्तां
प्रशस्तां
तां वन्दे ज्ञानरूपां निखिलभयहरां योगिनीं
योगमुद्राम् ॥”
इति छिन्नमस्ताप्रकरणम् । इति तन्त्रसार: ॥

छिन्नरुह:, पुं, (छिन्नोऽपि रोहतीति । रुह + “इगुपधज्ञेति ।” ३ । १ । १३५ । इति क: ।) तिलकवृक्ष: । इति राजनिर्घण्ट: ॥

छिन्नरुहा, स्त्री, (छिन्ने सत्यपि रोहतीति । रुह + क: । अजादित्वात् टाप् ।) गुड़ूची । इत्यमर: । २ । ४ । ८२ ॥ (यथास्या: पर्य्याया: ।
“वत्सादनी च्छिन्नरुहा मधुपर्ण्यम्टतामरा ।
कुण्डल्यम्टतवल्ली च गुड़ूची चक्रलक्षणा ॥”
इति वैद्यकरत्नमालायाम् ॥)
स्वर्णकेतकी । शक्तकी । इति राजनिर्घण्ट: ॥

छिन्नवेशिका, स्त्री, (छिन्नो विच्छिन्नो वेशो यस्या: । संज्ञायां कन् । ततष्टापि अत इत्वम् ।) पाठा । इति शब्दचन्द्रिका । आकनादी इति भाषा ॥

छिन्ना, स्त्री, (छिद्यतेऽसौ । छिद + क्त । “अजाद्यतष्टाप् ।” ४।१।४। इति टाप् ।) गुड़ूची । (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
“गुड़ूची मधुपर्णी स्यादम्टताम्टतवल्लरी ।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च ॥”
छिद्यते कुलात् वहिष्क्रियते इति ।) पुंश्चली । इति विश्व: ॥

छिन्नोद्भवा, स्त्री, (छिन्ना विभिन्ना सत्यपि उद्भवति पुनर्ज्जायते इति । उत् + भू + अच् । यद्वा, छिन्ने छेदनेऽपि उद्भव उत्पत्तिर्यस्या: ।) गुड़ूची । इति राजनिर्घण्ट: ॥ (गुड़ूचीशब्देऽस्या विवृतिर्ज्ञेया ॥)

छिलिहिण्ड:, पुं, (चिलिना वसनखण्डरूपतया हिण्डते अनाद्रियते इति । हिण्ड अनादरे + अच् । पृषोदरादित्वात् चस्य छ: ।) पातालगरुड़वृक्ष: । इति भावप्रकाश: ॥

छुछुन्दरी, स्त्री, (छुछुमित्यव्यक्तशब्दो दीर्य्यति निर्गच्छत्यस्या: । दृ + “सर्व्वधातुभ्य इन् ।” उणां ४ । ११७ । इति इन् । तत: कृदिकारादिति ङीष् ।) जन्तुविशेष: । छुँचा इति भाषा । तत्पर्य्याय: । गन्धमूषा २ । इति हेमचन्द्र: । ४ । ३६७ ॥ चिक्क: ३ वेश्मनकुल: ४ पुंडष: ५ गन्धमूषिक: ६ । इति त्रिकाण्डशेष: ॥ गन्धमूषिका ७ । इति हलायुध: । राजपुत्त्री ८ प्रतिमूषिका ९ सुगन्धिमूषिका १० गन्धसुण्डिनी ११ सुच्छिमूषिका १२ । इति राजनिर्घण्ट: ॥ गन्धाखु: १३ गन्धनकुल: १४ छुछु: १५ । इति हारावली । (छुछुन्दरि: १६ । इति मार्कण्डेयपुराणम् ।१५।३१॥
“अभ्यङ्गान्नाशयेत् क्षिप्रं गण्डमालां सुदारुणाम् ।
छुछुन्दर्य्या विपक्वन्तु ज्ञात्वा तैलवरं ध्रुवम् ॥”
इति वैद्यकचक्रपाणिसंग्रहे गण्डमालाधिकारे ॥)

छुट, क शि छेदे । इति कविकल्पद्रुम: ॥ (चुरां-तुदां च-सकं-सेट् ।) क, छोटयति । शि, छुटति । अच्छुटीत् । इति दुर्गादास: ॥

छुद्रं, क्ली, (छद + रक् । पृषोदरादित्वात् उत्वम् ।) प्रतीकरणम् । रश्मि: । इति संक्षिप्तसार उणादिवृत्ति: ॥

छुप, श औ स्पर्शे । इति कविकल्पद्रुम: ॥ (तुदां-परं-सकं-अनिट् ।) श, छुपति । औ, छोप्ता । इति दुर्गादास: ॥

छुप:, पुं, (छुप + घञर्थे क: ।) क्षुप: । स्पर्शनम् । इति मेदिनी । पे, ६ ॥ चपल: । युद्धम् । इति विश्व: ॥

छुर, छेदे । इति कविकल्पद्रुम: ॥ (भ्वां-परं-सकं-सेट् । छोरति । अच्छोरीत् ॥)

छुर, शि लेपे । इति कविकल्पद्रुम: । (तुदां-परं-सकं सेट् ।) शि, छुरति, अच्छुरीत् चुच्छोर । लेपश्छेद: । इति दुर्गादास: ॥

छुरा, स्त्री, (छुरति रञ्जयति नाशयति दुर्गन्धादिकमिति वा । छुर + क: टाप् च ।) सुधा । चूर्णम् । इति हारावली । १३५ ॥

छुरिका, स्त्री, (छुरति छिनत्तीति । छुर + क्कुन् । यद्वा, छुरी + स्वार्थे कन् । पूर्व्वह्रस्वश्च ।) अस्त्रविशेष: । छुरी इति ख्याता । तत्पर्य्याय: । शस्त्री २ असिपुत्त्री ३ असिधेनुका ४ । इत्यमर: । २ । ८ । ९२ ॥ छुरी ५ । इति भरत: ॥ खुरी ६ छूरी ७ कृपाणिका ८ धेनुपुत्त्री ९ । इति हेमचन्द्र: ॥ छूरिका १० । इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे ।२५।१४९ ।
“तावत् स्त्रियमपश्यत्तां छित्त्वा च्छुरिकया मुहु: ।
खादन्ती तस्य मांसानि पुंस: शूलाग्रवर्त्तिन: ॥”)

छुरितं, त्रि, (छुर + क्त: ।) खचितम् । इति जटाधर: ॥ (रञ्जितम् । यथा, माघे ।१।२२।
“परस्परेण च्छुरितामलच्छवी
तदेकवर्णाविव तौ बभूवतु: ॥”)
छिन्नञ्च ॥

छुरी, स्त्री, (छुरति छिनत्तीति । छुर छेदे + “इगुपधज्ञेति ।” ३ । १ । १३५ । इति क । ततो ङीष् ।) छुरिका । इति भरत: ॥

छूरिकापत्त्री, स्त्री, (छुरिका इव पत्त्राणि यस्या: । स्त्रियां ङीष् ।) श्वेता । इति राजनिर्घण्ट: ॥

छूरी, स्त्री, (छुरी + पृषोदरादित्वात् दीर्घ: ।) छुरिका । इति हेमचन्द्र: । ३ । ४४८ ॥

छृद, कि सन्दीपे । इति कविकल्पद्रुम: ॥ (चुरपक्षे भ्वां-परं-सकं-सेट् ।) सन्दीपनकरणम् । कि, छर्द्दयति छर्दति दीपं लोक: । इति दुर्गादास: ॥

छृद, उ च ष इर् देवने । त्विषि । वमने । इति कविकल्पद्रुम: ॥ (रुधां-उभं-सकं-सेट् । उदित्वात् क्त्वावेट् ।) उ, छर्द्दित्वा छृत्त्वा । च ष, छृणत्ति